# Shri Sarasvati Vandana

# શ્રીસરસ્વતીવન્દના

## Document Information

Text title : Sarasvati Vandana

File name : sarasvatIvandanA.itx

Category : devii, sarasvatI

Location : doc_devii

Author : AchArya satyanArAyaNa shukla, Shringverpur

Transliterated by : Akash Pandeya

Proofread by : Akash Pandeya

Description/comments : Composed by some Sanskrit teacher from the village of Akash

Latest update : November 18, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 10, 2023

*sanskritdocuments.org*

# શ્રીસરસ્વતીવન્દના

॥ શ્રીગણેશાય નમઃ । શ્રીપરમાત્મને નમઃ । શ્રીસરસ્વત્યૈ નમઃ ॥

કરામ્ભોજે માલાં શ્રિતશુભમરાલા મણિમયીં
સમુત્સઙ્ગે તન્ત્રીં સકલભયહન્ત્રીં વહતિ યા ।
સુહાસા સદ્ભાષા ધવલિતસુભાસા ગુણમયી
મુખામ્ભોજે ભોજપ્રભવવનિતા નો વિહરતુ ॥ ૧॥

શારદે સુખદેઽનિશં પાદામ્બુજે પ્રણમામ્યહં
શક્તિદે શુભદે સદા નમ્રસ્તવં વિદધામ્યહમ્ ।
શ્વેતામ્બરે શ્વેતાબ્જવર્ણે શ્વેતપદ્મવિલાસિનિ
શર્મદે વરદેઽધ્યતે કાઞ્ચિત્ કલા કલયામ્યહમ્ ॥ ૨॥

રાજતે વીણા યદુત્સઙ્ગે મરાલો વાહનં
મઞ્જુલે માલાકરે કાન્તિં કથં કથયામ્યહમ્ ।
જ્ઞાનદે મુનયો ન તે પારઙ્ગતાશ્છવિવર્ણને
શક્તિદે કથમદ્ભુતાન્નિખિલાન્ ગુણાન્ ગણયામ્યહમ્ ॥ ૩॥

તારિતા બહવો બુધાઃ કિં માં મુદા સમુપેક્ષ્યસે
દેવિ ચિન્તય ચેતસા ચિરકાલતોઽનુનયામ્યહમ્ ।
ત્વત્ કૃપાકલયા કલૌ કાલેઽપિ કીર્તિરવાપ્યતે
કામદે કવિકર્મદે નિતરામદોઽનુભવામ્યહમ્ ॥ ૪॥

કણ્ઠકૌણ્ઠ્યવિકુણ્ઠિતા સહસા પ્રગલ્ભગિરોઽભવ-
ન્યત્કૃપાકણતોઽદ્ભુતે ગુણગૌરવાણિ ગૃણામ્યહમ્ ।
દેવિ ત્વત્ સહયોગતો વિદિતોઽખિલો જગદુત્થિતં
બાલકો રહિતો ધિયા સ્તવને ત્રુટિં કૃતવાનલં
ભક્તિદે તત્ તત્ ક્ષમાર્થં પ્રાઞ્જલિં રચયામ્યહમ્ ॥ ૫॥

॥ શ઼ૃઙ્ગવેરપુરવન્દના ॥

દેવી યત્ર વિરાજતે ત્રિપથગા ભાગીરથી શર્મદા
    પ્રત્યક્ષેવ મનઃપ્રસાદજનની શાન્તા ચ શાન્તિપ્રદા ।
બ્રહ્મર્ષેર્નનુ શૃઙ્ગિણોઽતિવિમલં યસ્મિંસ્તપો વર્તતે
    તદ્વઃ શાન્તિસુખં સદા વિતનુતાં શ્રીશૃઙ્ગવેરં પુરમ્ ॥ ૬॥

ઇતિ આચાર્યસત્યનારાયણશુક્લવિરચિતા શ્રીસરસ્વતીવન્દના સમાપ્તા ।

Encoded and proofread by Akasha Pandeya

*Shri Sarasvati Vandana*

pdf was typeset on January 10, 2023

Please send corrections to *sanskrit@cheerful.com*